# Shri VishnustutiH

# શ્રીવિષ્ણુસ્તુતિઃ

## Document Information

Text title : Vishnustuti

File name : viShNustuti.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Author : Trivikrama Panditacharya

Proofread by : PSA Easwaran

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Shri VishnustutiH

# શ્રીવિષ્ણુસ્તુતિઃ

શ્રીમધ્વસંસેવિતપાદપદ્મં રુદ્રાદિદેવૈઃ પરિસેવ્યમાનમ્ ।
ઋષ્યાદિભિર્વેદપથૈઃ સુગેયં કથં નુ પશ્યેયમમોઘવીર્યમ્ ॥ ૧॥

હૃન્મન્દિરે સુન્દરરત્નપીઠે લક્ષ્મ્યાત્મકે સારતરે નિવિષ્ટમ્ ।
શ્રીભૂસમાશ્લિષ્ટતનું તથાઽપિ પૂર્ણં નિજાનન્દમયં પરેશમ્ ॥ ૨॥

અનન્તપૂર્ણેન્દુકિરીટશોભિતં સુનીલસ્નિગ્ધાલકશોભિસન્મુખમ્ ।
પ્રત્યગ્રકઞ્જાયતલોલલોચનં સુચમ્પકાકોરકનાસિકાયુતમ્ ॥ ૩॥

પ્રવાલમધ્યાર્પિતકુન્દકોરકં સ્ફુરત્કપોલદ્યુતિદીપ્તકુણ્ડલમ્ ।
કેયૂરભૂષાયુતબાહુદણ્ડકં સુચક્રશઙ્ખાબ્જગદાવિરાજિતમ્ ॥ ૪॥

ગ્રૈવેયરત્નાભરણાદિભૂષિતં સત્કૌસ્તુભાવેષ્ટિતકમ્બુકન્ધરમ્ ।
સુવર્ણસૂત્રાઞ્ચિતસુન્દરોરસં વિચિત્રપિતામ્બરધારિણં પ્રભુમ્ ॥ ૫॥

કરિરાજકરોપમોરુયુગ્મં પ્રિયયા સેવિતજઙ્ઘયા સમેતમ્ ।
વરકૂર્મપ્રપદેન શોભમાનં હ્યનભિવ્યક્તસુગુલ્ફપાદયુગ્મમ્ ॥ ૬॥

નખરાજિસુપૂર્ણચન્દ્રકાન્ત્યા નુતિમજ્જનતાપહારિણં રમેશમ્ ।
નિજપૂર્ણસુબોધવિગ્રહં પરમાનન્દપરાત્મદૈવતમ્ ॥ ૭॥

॥ ઇતિ શ્રીત્રિવિક્રમપણ્ડિતાચાર્યવિરચિતા શ્રીવિષ્ણુસ્તુતિઃ સમાપ્તા ॥

Proofread by PSA Easwaran

*Shri VishnustutiH*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*